# नवम: पाठ: पर्यावरणम्

## स्मरणीय तथ्य

- 'पर्यावरण' शब्द 'परि' तथा 'आवरण' के योग से बना है। 'परि' का अर्थ है 'चारों ओर' तथा 'आवरण' का अर्थ है - 'ढकने वाला' अर्थात् जो चारों ओर फैलकर हमें ढके हुए है । उसे पर्यावरण कहते हैं |
- प्रकृति ने हमारे लिए एक स्वस्थ एवं सुखद आवरण का निर्माण किया है, परंतु मनुष्य ने भौतिक सुखों की होड़ में उसे दूषित कर दिया है।
- हम सभी भोजन, हवा, पानी और अन्य जरूरतों के लिए पर्यावरण पर निर्भर हैं।
- इसलिए, प्रत्येक व्यक्ति के लिए अपने पर्यावरण को बचाना और संरक्षित करना महत्वपूर्ण है।
- हमें अधिक से अधिक वृक्षारोपण कर वातावरण को शुद्ध हरा -भरा एवं स्वच्छ बनाना चाहिए।

## बहुविकल्पात्मका: प्रश्ना:-

**1. प्रकृति: केषां संरक्षति?**
क. प्राणिनाम् ख. पर्यावरणम्
ग. सद्विचारम् घ. मानवम्

**2. का विविधै: प्रकारै: सर्वान् पुष्णाति तर्पयति च?**
क. प्रकृति: ख.मति:
ग. गति: घ.नदी:

**3. 'इयं सर्वान् पुष्णाति ।' अत्र क्रियापदं किं प्रयुक्तम्?**
क. इयं ख. सर्वान्
ग. सर्वा घ. पुष्णाति

**4. मानव: कुत्र सुरक्षित: तिष्ठति?**
क. कालकुक्षौ ख. रजतकुक्षौ
ग. पर्यावरणकुक्षौ घ. स्वर्णकुक्षौ

**5. सुरक्षितं पर्यावरणं कुत्र उपलभ्यते स्म ?**
क. गृहे ख. वने
ग. नगरे घ. भवने

**6. अजातशिशु: कुत्र सुरक्षित: तिष्ठति?**
क. जले ख. मातृगर्भे
ग. पवने घ. कानने

**7. 'परि+ आवरणम्' सन्धि: भवति -**
क. पर्यावरणम् ख. पर्यावरण
ग. पर्यावणम् घ. पर्यावरम्

**8. 'तथैव' इत्यस्य विच्छेद: भवति -**
क. तथ +इव ख. तथा+यिव
ग. तथा+ एव घ. तथा+ ऐव

**9. प्रकृति: कै: तर्पयति?**
क. सुखै: ख. साधनै:
ग. सुखधनै: घ. सुखसाधनै:

**10. के श्रोत्ररसायनं ददति?**
क. पुत्रा: ख. बालका:
ग. विहगा: घ. माला :

**11. 'आधुनिककाले' इति पदस्य विपर्ययपदं किम् अस्ति?**
क. मध्यकाले ख. नवकाले
ग. प्राचीनकाले घ. पाषाणकाले

**12. 'विविधा: विहगा:' अत्र विशेषणपदं किम् अस्ति?**
क. विविधा: ख. विहगा:
ग. विविध: घ. विहग:

**13. 'ऋषयो वने निवसन्ति स्म।' अत्र कर्तृपदं किम् अस्ति?**
क. ऋषय: ख. वने
ग. निवसन्ति घ. स्म

**14. स्वल्पलाभाय के बहुमूल्यानि वस्तूनि नाशयन्ति?**
क. जना: ख. पशव:
ग. मत्स्या: घ. नद्य:

**15. जना: यन्त्रागाराणां विषाक्तं जलं कुत्र निपातयन्ति?**
क. नद्यां ख. वने
ग. मातृगर्भे घ. ग्रामे

**16. मानवा: व्यापारवर्धनाय कान् निर्विवेकं छिन्दन्ति ?**
क. वनवृक्षान् ख. ग्रामवृक्षान्
ग. भवनवृक्षान् घ. नगरवृक्षान्

**17. 'विषाक्तं जलम्' अत्र विशेष्यपदं किम्?**
क. जलम् ख. विषाक्तं
ग. विषाक्तंजलम् घ. विषाक्तजलम्

**18. कीदृश: मानव: अद्य पर्यावरणं नाशयति ?**
क. अन्ध: ख. अत्यान्ध:
ग. स्वल्पान्ध: घ. स्वार्थान्ध:

**19. कस्या: जलं सर्वथा अपेयं जायते ?**
क. मत्यस्य ख. वनस्य
ग. नद्या: घ. गंगाया:

**20. 'ऋषय:' इति पदस्य पर्यायपदं किम् अस्ति?**
क. आर्ष: ख. सरोवर:
ग. श्वान: घ. देवालय:

**21. मानवा: कस्मै वनवृक्षान् निर्विवेकं छिन्दन्ति -**
क. स्नेहवर्धनाय ख. भोजनवर्धनाय
ग. धर्मवर्धनाय घ. व्यापारवर्धनाय

**22. पर्यावरणमपि कस्य अङ्गमिति ऋषय: प्रतिपादितवन्त:?**

क. जनस्य  ख. देवस्य
ग. असुरस्य  घ. धर्मस्य

**23. पञ्चतत्त्वानि मिलित्वा किं रचयन्ति?**

क. पर्यावरणम्  ख. जलम्
ग. तेज:  घ. आकाश:

**24. कानि बाहुल्येन समुपहरन्ति?**

क. फलानि  ख. पुष्पाणि
ग. इन्धनकाष्ठानि  घ. पत्राणि

**25. कति प्रमुखानि तत्वानि सन्ति?**

क. पञ्च  ख. सप्त
ग. नव  घ. दश

**26. 'धर्मो रक्षति रक्षित:' इति कीदृशं वचनम्?**

क. आर्षवचनम्  ख. धर्मवचनम्
ग. नूतनवचनम्  घ. देववचनम्

**27. शुद्धपर्यावरणम् केभ्य: जीवनं यच्छति?**

क. अहम्  ख. माम्
ग. अस्मभ्यम्  घ. अस्माकम्

**28. प्रकृति: किं प्रददाति?**

क. जीवनदु:खम्  ख. जीवनसुखम्
ग. जीवम्  घ. जालम्

**29. के निर्विवेकं छिद्यन्ते ?**

क. वनवृक्षा:  ख. मानवा:
ग. ऋषय:  घ. जना:

**30. वृक्षकर्तनात् क: न प्राप्यते?**

क. शुद्धवायु:  ख. अशुद्धवायु:
ग. मन्दवायु:  घ. तीव्रवायु :

## बहुविकल्पात्मक-प्रश्नानाम् उत्तराणि

1. क. प्राणिनाम्
2. क. प्रकृति:
3. घ. पुष्णाति
4. ग. पर्यावरणकुक्षौ
5. ख. वने
6. ख. मातृगर्भे
7. क. पर्यावरणम्
8. ग. तथा+ एव
9. घ. सुखसाधनै:
10. ग. विहगा:
11. ग. प्राचीनकाले
12. क. विविधा:
13. क. ऋषय:
14. क. जना:
15. क. नद्यां
16. क. वनवृक्षान्
17. क. जलम्
18. घ. स्वार्थान्ध:
19. ग. नद्या:
20. क. आर्ष:
21. घ. व्यापारवर्धनाय
22. घ. धर्मस्य
23. क. पर्यावरणम्
24. ग. इन्धनकाष्ठानि
25. क. पञ्च
26. क. आर्षवचनम्
27. ग. अस्मभ्यम्
28. ख. जीवनसुखम्
29. ख. मानवाः
30. क. शुद्धवायु:

## अतिलघूत्तरीया: प्रश्ना:

### एकपदेन उत्तरत-

1. कस्मिन् काले लोकमङ्गलाशंसिन: ऋषयो वने निवसन्ति स्म?
2. लोकरक्षा कया सम्भवति?
3. के वनवृक्षान् छिन्दन्ति ?
4. क: पर्यावरणकुक्षौ सुरक्षित: तिष्ठति?
5. सरितो गिरिनिर्झराश्च कीदृशं जलं प्रयच्छन्ति ?

**वर्णवियोजनं कुरुत -**

6. प्रकृति:-
7. अस्मभ्यम्-
8. पर्यावरणम्-
9. वृक्षा:-
10. अद्य -

**पदनिर्माणं कुरुत -**

11. गम्+ क्तिन्=
12. मन्+क्तिन् =
13. जन्+क्तिन् =
14. भी +क्तिन् =
15. दृश्+क्तिन्=

## अतिलघूत्तरीय-प्रश्नानाम् उत्तराणि

1. प्राचीनकाले
2. प्रकृतिरक्षया
3. मानव:
4. मानव:

5. निर्मलम्
6. प्+र्+अ+क्+ऋ+त्+इ:
7. अ+स्+म्+अ+भ्+य्+अ+म्
8. प्+अ+र्+य्+आ+व्+अ+र्+अ+ण्+अ+म्
9. व्+ऋ+क्+ष्+आ:
10. अ+द्+य्+अ
11. गति:
12. मति:
13. जाति:
14. भीति:
15. दृष्टि:

## लघूत्तरीया: प्रश्ना:

### पूर्णवाक्येन उत्तरत-

1. प्रकृते: प्रमुखतत्त्वानि कानि सन्ति ?
2. विकृतिमुपगते पर्यावरणे के भीषणसमस्याश्च सम्भवति?
3. परिष्कृतं पर्यावरणम् अस्मभ्यं किं किं ददाति?
4. अस्माभि: पर्यावरणस्य रक्षा कथं करणीया?
5. प्रकृति: केषां संरक्षणाय यतते?

## लघूत्तरीया: प्रश्नानाम् उत्तराणि

1. पृथिवी, जलं, तेज:, वायु:, आकाश: च प्रकृत्या: प्रमुखानि तत्त्वानि।
2. विकृतिमुपगते पर्यावरणे विविधा: रोगा: भीषणसमस्याश्च सम्भवति।
3. परिष्कृतं पर्यावरणम् अस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसङ्कल्पं, माङ्गलिकसामग्रीञ्च प्रददाति।
4. वापी कूपतडागादिनिर्माणं कृत्वा, कुक्कुरसूकरसर्पनकुलादिस्थलचराणां मत्स्यकच्छपमकरप्रभृतीनां जलचराणां रक्षणेन पर्यावरणस्य रक्षा करणीया।
5. प्रकृति: समेषां प्राणिनां संरक्षणाय यतते।

## दीर्घोत्तरीय-प्रश्ना:

**1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

भारतीया संस्कृतिः कर्मसिद्धान्तं प्रतिपादयति। जीवाः कर्मवशात् विविधाः योनीः लभन्ते। मनुष्ययोनिं लब्ध्वा यदि कश्चित् जीवः धर्मार्थकामनया सामञ्जस्यं स्थापयित्वा जीवनं निर्वहति तदा सः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते। विश्वस्य सर्वासु अपि संस्कृतिषु भारतीया संस्कृतिः प्राचीनतमा वर्तते। समन्वयात्मकस्वभावात् सहिष्णुताप्रकर्षत्वात् च अनन्तान् भीषणतमान् प्रहारान् सोढ्वा अपि एषा जीवति। भारतीया संस्कृतिः सर्वेषां देशानां जातीनां च कल्याणं कर्तुं सक्षमाऽस्ति।

**I. एकपदेन उत्तरत-**

(i) भारतीया संस्कृतिः किं प्रतिपादयति ?

(ii) जीवाः कस्मात् विविधाः योनीः लभन्ते?

**II. पूर्णवाक्येन उत्तरत-**

(i) कदा मनुष्यः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते ?

(ii) भारतीया संस्कृतिः किं कर्तुं सक्षमाऽस्ति ?

**III. भाषिककार्यम्-**

(i) 'लभन्ते' इति क्रियायाः कर्तृपदं किम् ?

(ii) 'समर्था' इति पदस्य अत्र किं पर्यायपदम् ?

(iii) 'आबद्धः' इति पदस्य अत्र किं विलोमपदम् ?

**IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।**

**2. भवतः नाम गणेशः अस्ति। भवान् छात्रावासे निवसति। अजन्ता-एलोरा-गुहां प्रति शैक्षणिक-भ्रमणाय गन्तुम् इच्छति। तदर्थं धनप्रेषणार्थं पितरं प्रति लिखितं पत्रं मञ्जूषायां प्रदतैः उचितपदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत-**

छात्रावासतः
मुम्बईनगरम्
दिनांकः-----------

परमादरणीयाः (i)----------------
सादरं (ii)-----------------

सविनयं (iii)------------------यत् मम मासिकी परीक्षा समाप्ता जाता। मम उत्तरपत्राणि (iv)------------------- अभवन् । अस्मिन् (v)-----------------अहं गृहं न आगमिष्यामि, यतः विद्यालयेन एकस्याः (vi)---------------प्रबन्धः कृतः। एषा यात्रा अजन्ता-एलोरा-गुहानां दर्शनाय आयोजिता अस्ति । यात्रा व्ययार्थं (vii)----------------- रूप्यकानि प्रेषयन्तु भवन्तः । शेषं सर्वं कुशलम्। (viii)------------------अग्रजाय च सादरं प्रणामाः ।

भवदीयः (ix)-------------------
(x)----------------------

| |
|---|
| शरदवकाशे, द्विसहस्रम्, प्रियपुत्रः, निवेदयामि, शैक्षिकयात्रायाः, प्रणमामि, जनन्यै, गणेशः, पितृमहाभागाः, शोभनानि |

**3. 'अस्माकं पर्यावरणम्' इति विषयम् आधृत्य संस्कृतभाषायां पञ्च-वाक्यानि लिखत।**

## दीर्घोत्तरीय-प्रश्नानाम् उत्तराणि

1. I. (i) कर्मसिद्धान्तम्

(ii) कर्मवशात्

II. (i) मनुष्ययोनिं लब्ध्वा यदि कश्चित् जीवः धर्मार्थकामनया सामञ्जस्यं स्थापयित्वा जीवनं निर्वहति तदा सः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते ।

(ii) भारतीया संस्कृतिः सर्वेषां देशानां जातीनां च कल्याणं कर्तुं सक्षमाऽस्ति ।

III. (i) जीवाः (ii) सक्षमा (iii) विमुक्तः

IV. 'भारतीया संस्कृतिः' ।

2. (i) पितृमहाभागा: (ii) प्रणमामि
(iii) निवेदयामि (iv) शोभनानि
(v) शरदवकाशे (vi) शैक्षिकयात्रायाः
(vii) द्विसहस्रम् (viii) जनन्यै
(ix) प्रियपुत्रः (x) गणेशः

3. (1) 'परि+आवरणम् ' इति पर्यावरणम् भवति।
(2) अस्मिन् पृथिवी, जलं, तेजः, वायुः, आकाशः च तत्त्वानि भवन्ति।
(3) एतानि तत्त्वानि मिलित्वा पर्यावरणम् रचयन्ति।
(4) शुद्धं परिष्कृतं च पर्यावरणम् एव अस्माकं जीवनम्।
(5) अत एव वृक्षादि - माध्यमेन अस्माभिः पर्यावरणं रक्षितव्यम्।